International Journal of Sanskrit Research 2021; 7(1): 377-380

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(1): 377-380
© 2021 IJSR
www.anantaajournal.com
Received: 16-10-2020
Accepted: 21-12-2020

**डॉ० रमेश कुमार झाः**
सहायकाचार्यः, साहित्य–विभागः,
ज० ना० ब्र० आदर्श संस्कृत
महाविद्यालय, लगमा, (रामभद्रपुर),
वाया–लोहना रोड, जिला–दरभङ्गा,
बिहार, भारत

**Corresponding Author:**
**डॉ० रमेश कुमार झाः**
सहायकाचार्यः, साहित्य–विभागः,
ज० ना० ब्र० आदर्श संस्कृत
महाविद्यालय, लगमा, (रामभद्रपुर),
वाया–लोहना रोड, जिला–दरभङ्गा,
बिहार, भारत

# महाकविकालिदासकृतिषु दाम्पत्यजीवनस्य विविधसन्दर्भाः तेषां मूल्यांकनं च

**डॉ० रमेश कुमार झाः**

**प्रस्तावना**

भारतीयनां पाश्चात्यानां च समालोचकानां मापकतुलासु तन्निकषेषु च कविकुलशिरोमणिः महाकविकालिदासः संस्कृतभाषायाः श्रेष्ठः कविः सिद्धो भवति। महाकविकालिदासः भारतीयसंस्कृतेः अमर गायकः। भारतीयसंस्कृतौ आत्मकल्याणमार्गः तपश्चर्या वर्तते। वस्तुतः मानवजीवनं धर्ममूलकमस्ति। जीवने यदा मर्यादाभङ्गः क्रियते तर्हि विविधप्रकारेण जीवनं संकटापन्नस्थितौ संजायते। इदमेव कारणमस्ति यत् महाकवि– कालिदासः श्रुतिस्मृतीतिहासपुराणप्रतिपादितं भारतस्य सनातनं धर्मं प्रति पूर्णतया निष्ठावान् अस्ति। भारतीयसंस्कृतेः यत् गौरवं श्रुतिस्मृतीतिहासपुराणात्मके वाङ्मये गीयते तस्य एव एकं काव्यमयं रूपं प्रदातुं प्रयत्नः कालिदासेन कृतः।

कामः सृष्टेः परमसत्यमस्ति। एतदर्थं प्रतिष्ठितरीत्या कामसेवनकर्तुं वैदिककाले एव 'विवाहसंस्था' विकसिता आसीत्। ऋग्वेदीये समाजे पारिवारिकजीवनम् एतादृशे विकसिते रूपे आसीत् यदत्र माता, पिता, पुत्रः पुत्री, पतिः, पत्नी इत्यादयः सर्वेऽपि सम्बन्धः आसन्। अथ च अनेन प्रकारेण अस्मिन् समाजे गृहस्थाश्रमः विकसिते रूपे आसीत्। अस्य आश्रमस्य आधारभूता विवाहप्रथा समीचीनतया प्रचलितवती आसीत्। प्राचीनभारतीये समाजे वर्णव्यवस्था एवं वर्णाश्रमव्यवस्था विकसिता आसीत्। अनया व्यवस्थया श्रमविभाजनादिना भारतीयसमाजस्य दृढ़े संघटने अनुशासने, अथ च तस्य सम्पन्नत्वस्य सुखसमृद्धियुक्तत्वस्य बलिष्ठत्वस्य च सम्पादने महत्त्वपूर्णं योगदानं दत्तम्।

महाकवि कालिदासकालीन समाजेऽपि वर्णाश्रमप्यवस्था आसीत्। सामाजिक– व्यवस्थादृष्ट्या कालिदासः पूर्वपरम्परागते वर्णाश्रमधर्मे आस्थामाधत्ते। तदनुसारेण समाजे ब्राह्मणस्य सर्वोच्च स्थानमस्ति, अथ च तस्मादपि तपस्विनः महर्षयश्च उच्चराशयः राज्ञा अपि एतेषां सर्वेषाम् असमक्षं नतमस्तकेन भाव्यम। कालिदासः श्रुतिस्मृतिप्रतिपादितवर्णाश्रम– धर्मस्य मर्यादायाश्चानुसारेण सर्वेषां पारिवारिकाणां सामाजिकानां च व्यवहाराणां मूल्यांकनं करोति। एतदेव कारणं यत् प्रेम्णः विषये सन्तानफलकः मर्यादितः दाम्पत्यप्रमा एव तस्य आदर्शः।

समाजस्य लघ्वंशः भवति परिवारः। स्त्रीपुरुषौ गृहस्थरूपस्य यानस्य द्वौ चक्रौ भवतः। नारी जगतोऽस्य सर्जनात्मिका अर्धाङ्गिणीरूपा भवति। वैदिकविवाहस्य अविच्छेद्यत्वं च प्रतिपाद्यते। जायमेव मानवस्य पूर्णत्वं संजायते। गृहस्थाश्रमे नार्यः प्राधान्यं दृश्यते। तद्यथा महाभारते शान्तिपर्वणि कथ्यते–[1] 'न गृहं गृहमित्याहुहिणी गृहमुच्यते' इति।

नारी समाजस्य आधारशिला विद्यते। पुरुषस्य सहयोगिनीरूपेण सा कार्यं करोति। सा पुरुषैः सह यज्ञादिकर्माणि सम्पादयति। जन्मतः विवाहकालं यावत् पितुः गृहे 'कन्या' इति पावनशब्देन वाच्यायाः अस्याः समाजे परमं महत्त्वमस्ति। पत्नीरूपेण विवाहोपरान्तं सा गृहस्वामिनी पदमलंकरोति। वेदे यथोच्यते विवाहावसरे–[2]

> 'सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्वां भव।
> ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवेषु।।'
> 'जायेदस्तं जाया एव अस्तं गृहमित्यर्थः'[3] इति।

वस्तुतः दाम्पत्यजीवने मर्यादित चरित्रस्य महत्त्वं वर्तते। यदा स्वजीवने मर्यादाभङ्गं न क्रियते तर्हि कदापि चिरस्थायी सुखदस्थितिं लभते। नारी सर्जनात्मिका शक्तिरूपा विद्यते। निखिलजगति भ्रमोत्पादिका मायारूपा ब्रह्मशक्तिरपि नारीस्वरूपे अवस्थितास्ति। अस्माकं धर्मशास्त्रैरपि– 'स्त्रियः समस्तास्तव देवि भेदाः' इति वचनानुसारेण सर्वाः स्त्रियः महमायायाः आद्याशक्तेः स्वरूपेणैव प्रतिपादिताः। शीलवती कन्यायाः एव समाजः सम्मानं करोति। अन्यथा दुश्चरित्राः स्त्रियः कुत्रापि अपमानिता भवन्ति।

इदमेव शिक्षयति स्वग्रन्थेषु महाकविकालिदासः। तस्या एव नार्यः सर्वस्मिन् गृहे सम्मानं भवति या सदाचारिणी भवति। गृहेषु पुरुषाणां कृते नारी सर्वथा मित्रवत् कार्यं करोति। नारीशब्दस्यार्थः व्युत्पत्तिः– 'न अरिः इति नारी'। नार्यः भारतीयसंस्कृतौ सम्मानः क्रियते– गृहिणीरूपेण, गृहस्वामिनीरूपेण, सहधर्मिणीरूपेण च। भारतीयसंस्कृतिः एकपत्नीत्वव्रतस्य एवं च पातिव्रत्यधर्मानुपालनस्यैव अनुशंसां करोति। इन्द्रियलोल्यवशात् बहुविवाहः गृहे कलहं क्लेशं च उत्पादयति। संस्कारी सन्तानोत्पत्तिः एव दाम्पत्यजीवनस्य उद्देश्यं भवति। सच्चरित्रं मुनष्यस्य जीवने धर्मस्य महन्महत्त्वं विद्यते। सर्वेषु धर्मेषु आचारस्य महती महिमा वर्णिता अस्ति। सच्चरित्रमानव एव जीवनस्य सर्वेषु क्षेत्रेषु कीर्तिं लभते। तद्यथा–[4]

'सदाचारः यशो लोके सदाचारः सुखं दिवि।
सदाचाराद्भवेन्मोक्षः सदाचारी हि कामधुक्।।'

अतएव सदाचारी पिता सदाचारिणी माता एव संस्कारिणं सन्तानम् उत्पन्नं कर्तुं शक्यते। अतएव महाकविकालिदासकृतसत्प्रकृतिषु इदमेव वर्णितमस्ति यत् मर्यादित– दाम्पत्यजीवनमेव श्रेयस्करः भवति। यदा कर्तव्यच्युतं भूत्वा बाह्याकर्षणात् वशीभूतं भूत्वा इन्द्रियलौल्यवशात् अमर्यादित येन तृप्तिं क्रियते तर्हि जीवनं क्लेशविषादयुक्तं भवति। सर्वत्र अपमानः भवति। यः दाम्पत्यजीवनस्य उद्देश्यं नास्ति। मर्यादितरीत्या कामसेवनमेव श्रेयस्करः भवति।

तत्र महाकविकालिदासकृत सप्तकृतयः सन्ति

क. द्वे महाकाव्ये स्तः–
1. रघुवंशमहाकाव्यम् (ऊनविंशतिसर्गात्मकम्)
2. कुमारसंभवमहाकाव्यम् (सप्तदशसर्गात्मकम्)

ख. द्वे गीतिकाव्ये स्तः–
1. ऋतुसंहारम्
2. मेघदूतम्

ग. त्रीणि नाट्यग्रन्थानि सन्ति–
1. विक्रमोर्वशीयम्
2. अभिज्ञानशाकुन्तलम्
3. मालविकाग्निमित्रम्

ऋतुसंहारं कालिदासस्य प्रारम्भिकी रचना प्रतीयते। अस्मिन् ग्रन्थे यथा च अस्य नाम्ना एव प्रकरणमस्ति। अत्र षण्णाम् ऋतूनां वर्णनं कृतं विद्यते। अन्य षट्कृतिषु दाम्पत्यजीवनस्य विविधसन्दर्भानां दर्शनं भवति। तत्र या शिक्षा कालिदासेन दीयते सा सार्वकालिकं सार्वभौमिकं महत्त्वं विदधाति।

मनुस्मृतौ अष्टप्रकाराणां विवाहपद्धतीनां वर्तते। तद्यथा–[5]

'ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽऽसुरः
गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः।।'

ब्राह्मणस्य ब्राह्मादिक्रमे 'षट्' क्षत्रियस्यावरानुपरितनानासुशदींश्चतुरः विट्– शूद्रयोस्तु तानेव राक्षसवर्जितानासुरगान्धर्व पैशाचान् धर्मादनपेताश्जानीयात् ब्राह्मणानां कृते ब्राह्म, दैव, आर्ष, प्राजापत्य, आसुर गान्धर्वरीत्या विवाहः अनुमोदितः आसीत्। क्षत्रियाणां कृते आसुरः, गान्धर्वः राक्षसः पैशाचः विवाहपद्धतिरनुमोदिता आसीत्। वैश्यानां शूद्राणां च कृते आसुरः, गान्धर्वः पैशाचश्च विवाहपद्धतेः विधानमासीत्।
महाकविकालिदासकृतिषु उपर्युक्तविवाहप्रकारेषु चतुर्णां विवाहानां चित्राङ्कनम् अस्ति– प्राजापत्यरीत्या विवाहस्य, स्वयंवरमायोजितं कृत्वा स्वयंवर विवाहस्य, गांधर्व विवाहस्य तथा आसुर विवाहस्य चर्चामात्रं करोति कालिदासः। एतेषु विवाहपद्धतिषु के के गुणाः के के दोषाश्च आसन् तत्सर्वं दर्शयति कालिदासः।
महाकविकालिदासस्य मन्तव्यमस्ति यत् वैवाहिकप्रसंगे यदा क्षमिभावकैः सह परामर्शं कृत्वा दारकर्मः सम्पाद्यते तदा सः दाम्पत्यजीवनं सुखदायी भवति। मानवजीवने अभिभावकानां आशीर्वचनं परमलाभप्रदं भवति। भारतवर्षस्य चारित्रिकी शिष्टाचारसम्बन्धिनी वा शिक्षा अतीव उच्चस्तरीया अनुकरणीया च वर्तते। अत्र 'मातृदेवो भव', 'पितृदेवो भव', 'आचार्यदेवो भव', 'अतिथिदेवो भव' इत्यादिरूपेणायमुपदेशः दत्तः वर्तते यत् मातापितरौ आचार्यः अतिथिश्च, एते सर्वे देवरूपे अनुभाव्यः सेव्याश्च सन्ति। अत्र जीवनस्य विभिन्नेषु क्षेत्रेषु व्यवहरणीया उन्नता चारित्रिकी शिक्षा दत्ता वर्तते या भारतीयसंस्कृतेः गौरवं प्रकटयति।
कुमारसंभवमहाकाव्ये– प्राजापत्यरीत्या विवाहस्य विशदवर्णनं समुपलभ्यते। प्राजापत्य– विवाहपद्धतौ विविधवैवाहिकसंस्काराणां सम्पादनं क्रियतेस्म। वैवाहिकी वार्ता वरपक्षतः वधूपक्षतः सर्वप्रथमं वार्ता निमित्तनियोजितपुरोहितः कुर्वन्तिस्म। अस्मिन् कार्ये गृहिण्याः सत्परामर्श अपि अपेक्षितः आसीत्। समाजः पितृप्रधानः आसीत्। अत एव पितुः अनुमति एव सर्वोपरि आसीत्। शीलवती कन्या पार्वती अभीष्टं वरमवाप्तुं भगवान्तं शंकरं पतिरूपेण प्राप्तुम् उग्रतपः कृतवती। परं यदा भगवान् शंकरः प्रसन्नः अभवत् तर्हि वैवाहिक अनुमति– मवाप्तुं भगवन्तं शंकरं स्वपितुः समीपे प्रेषयति। सा कथयति मम वैवाहिकनिर्णयस्य अधिकारी मम पिता हिमवान् अस्ति। तस्य आदेशात् एव वैवाहिक दारकर्मः सम्पन्न भवितुं शक्यते। भगवान् शंकरः अपि वरपक्षतः सप्तऋषिभिः सह आर्यां अरुन्धतीमपि हिमालयगृहे प्रेषयति। सा अत्र कथयति वैवाहिकसम्बन्धं कारयितुं स्त्रियः विपुणाः भवन्ति। यथा–

'आर्याऽरुन्धती तत्र व्यापारं कर्तुमर्हति।
प्रायेणैवंविधे कार्ये पुरंध्रीणां प्रगल्भता।।'

हिमवतः समक्षं सप्तऋषयः अरुन्धती च वैवाहिकप्रस्तावम् उपस्थापयित्वा कथयन्ति–

'तमर्थानिव भारत्या सुतया योक्तुमर्हसि।
अशोच्या हि पितुः कन्या सा पतिप्रतिपादिता।'

सप्तऋषयः हिमवानं प्रति कथयन्ति यत् पार्वत्या सह शंकरस्य विवाहस्य अनुमतिं ददतु तौ दाम्पत्यसूत्रस्य अविच्छेद्यबन्धनेनानेन प्रकारेण संपृक्तं करोतु यथा वागर्थः संपृक्तौ भवतः। सुयोग्यपत्या सह कन्यायाः विवाहं कृत्वा पितुः निश्चिन्ततामनुभवति। हिमवानः एवं पत्न्या मेनया सह परामर्शकृत्या विवाहकर्तुमनुमतिप्रदानमकुर्वन्। तत्पश्चाद् दारकर्मः विविधैः कृत्यैः सम्पादयित्वा सम्पन्नः अभूतः। वैवाहिककृत्यानां कालिदासः विशद् वर्णनं करोति। नारदपुराणे विवाहविषये उल्लेखमस्ति–[8]

'कुशा द्विजा जलं वह्निर्वेदा भूतकालदिक्सुयः।
साक्ष्ये यत्र विवाहेषु दाम्पत्यं तदुदीरितम्।।'

हिमवान् यदा पार्वत्या विवाहं सुनिश्चितं अकुर्वन् तर्हि गृहे–गृहे उत्सवं सदृशं दृश्यं व्याप्तः अभवता हिमवातः सम्पूर्ण नगरं सुसज्जितं कारयितवान्। बन्धुबान्धवाः पार्वत्याः कृते वस्त्राभूषणमुपहारस्वरूपं प्रत्यर्पितमकुर्वन्।[9]
सूर्यादि यस्य त्रिमुर्हूत पश्चात् उत्तराफाल्गुनी नक्षत्रे कुटुम्बिनी सौभाग्यवती स्त्रियः, पुत्रवत्यः स्त्रियः पार्वत्याः श्रृंगारमकुर्वन्। तां मांगलिक स्नानं कारयित्वा वैवाहिकवस्त्राभूषणैः वधूजनोचितमांगलिकश्रृंगारं कृतवती। तथैव भगवान् शंकरोऽपि वररूपेण मांगलिकवस्त्राभूषणः सुसज्जितं भूत्वा बन्धुबान्धवैः सह हिमवानस्य द्वारे विवाहकर्तुं समागच्छन्। सप्तऋषयः वैवाहिककर्म कारयितुं पुरोहितरूपेण नियुक्तः आसन्।

हिमवानः अपि स्वबंधुबान्धवैः सह वरपक्षस्य कुटुम्बीनां स्वागतं अकुर्वन्। महादेवशंकराय रत्नं अयं मधुंदधिं एवं नूतनं वस्त्रं उपहारस्वरूपं प्रत्यर्पितं अकुर्वन्। तत्पश्चात् विवाहमण्डपे शास्त्रीयरीत्या पुरोहितेन वैवाहिककृत्यानां संपादनं कारयितवान।[10]

"शिवेन भर्ता सहधर्मचर्या कार्या त्वया मुक्तं विचारयेति"

महादेवः पार्वत्या सह विवाहकाले कथयति– ध्रुवदर्शनं कुरू पार्वती अपि कथितवती आम् अपश्यम्[11]
अत्र द्वेवार्ते ध्यातव्यअस्ति। महाकविकालिदासः दाम्पत्य "जीवने सध्धर्माचरणम्" एवं च वैवाहिकसंबन्धस्य अविच्छेद्यतां प्रति एवं सहज स्वीकृति प्रदानं करोति। सामाजिक साक्षित्वे सम्पन्नः विवाहः चिरस्थायी भवति।
अभिज्ञानशाकुन्तलम् नाटके गान्धर्वरीत्या विवाहस्य संदर्भः दृश्यते अभिज्ञानशाकुन्तलम् नाटके राजादुष्यन्तः श्क्षत्रिय वर्णस्य अस्ति। अत्र सवर्णविवाहस्य संकेतः प्राप्यते। राजादुष्यन्तः शकुन्तलां प्रति यदा मांसलसौन्दर्यं वीक्ष्य कामासक्तः भवति तथापि गांधर्वरीत्या विवाहः तदा करोति यदा सः आश्वस्थः भवति यत् इयं शकुन्तला क्षत्रिया वर्णा अस्ति। परम एतादृशः विवाहसम्बन्धस्थापने विकटस्थितिरपि उत्पन्नः भवति। सामाजिकमर्यादा दृष्ट्या दाम्पत्यजीवने अस्य दुष्प्रभावः भवति। भारतीयसंस्कृती स्त्री कदापि स्वतंत्रः नास्ति। वशिष्ठस्मृतौ, बौधायनस्मृतौ मनुस्मृतौ उच्यते

''पिता रक्षति कौमारे भर्ता रक्षति यौवने।
पुत्रस्तु स्थविहे भावे न स्त्री स्वातन्त्र्यमर्हतीति।।[12]

राजादुष्यन्तेन सह शकुन्तला यदा गान्धर्वरीत्या विवाहं कृतवती। तस्मिन् विषये सा न तु बन्धुबान्धवैः सह परामर्श कृतवमी नहि पितुः आदेशस्य प्रतीक्षां कृतवती। विवाहावसरे दुष्यन्तः एकं स्वनामांकितं अंगुलीयक शकुन्तलायै दत्तवान्। तयोः विवाहस्य साक्षी एकमात्रं अगुलीयकमासीत्। यत्र एतादृशः पावन सम्बन्धः अंगुलीयकमुपरिस्थापयते तर्हि एतादृशः स्थापितस्य दाम्पत्यसम्बन्धस्य आनन्दः क्षणिकः भवति। तथैव नाटके अभवत्। शकुन्तला अतिथिसत्काराय आश्रमे पितुः कण्वस्य आदेशात् नियुक्ताः आसीत्। परं स्वंकर्त्तव्यं प्रति सा यदा कर्तव्यच्युतारू अभवत् तर्हि दुर्वाशसः शापात् शापिता अभवत् कण्वाश्रमे महर्षिः दुर्वासा समाजगाम। अतिथिसत्काराय नियुक्ता शकुन्तला स्वप्रणयिजन संसक्तमानसतया समीपेऽपि तस्यागमननावेदीत्। तदा सुलभकोपः दुर्वासा निजापमानेन क्रुद्धा शकुन्तलाम् अशपत्–

विचिन्तयन्ती यमनन्यमानसा
तपोनिधिं वेत्सि न मामुपस्थितम्
स्मारिष्यतित्वां न स बोधितोऽपि सन्
कथां प्रमत्तः प्रथमं कृतामिव।।[13]

अर्थात् अनन्यमानसा यं विचिन्तयन्ती उपस्थितम् तपोनिधिम् मां न वेत्सि, सः प्रमत्तः प्रथमं कृतां कथां इव बोधितः सन् अपि त्वां न स्मरिष्यति। वस्तुतः आगतातिथिनां यदा गृहे सम्यक् सत्कारं न क्रियते तस्य गृहस्थस्य अभीष्टकामनानां सिद्धिः कदापि न भवति। इदं भारतीयसंस्कृतेः मान्यता अस्ति।
अत्र नाटके शकुन्तला विविधासु अवस्थासु रम्यरूपेण सह इत्थं चित्रिता वर्तते यत् तस्याः चित्रणेन समग्रस्य आदर्शभूतस्य भारतीयनारीजीवनस्य एव चित्रणं जातमस्ति। कौमार्ये कथंमु वासनारेणुसंसृष्टः पूर्वानुरागः भवति, कथं च तस्या अनुरागस्य विवाहे परिणतिः, कथम् च तत्पश्चात् पितृगृहे पतिदर्शनोत्कण्ठा भवंति। पितृगृहात् प्रस्थानावसरे कीदृशी भावधारा, पत्युःगृहे अपमानम् अनुभूय अपि कीदृशी धैर्यपूर्णा मनः स्थिति, वासनारेणु निरासे च कीदृशः निर्मलः प्रेमः, इत्यादिकं सर्वमपि भारतीयनारीजीवनं अत्र चित्रितम् अभिव्यक्तं वा वर्तते। सदैव दुष्यन्तशकुन्तला संबन्धात् पुरूषजीवनमति अत्र चित्रितं अस्ति। पुरूषस्य प्रेमि रूपेण, पति रूपेण च व्यवहारस्य चित्रणं दुष्यन्तस्य माध्यमेन अत्र कृतं वर्तते, पितृरूपेण व्यवहारः कण्वमाध्यमेन कृतः वर्तते।
मानवजीवने यदा अज्ञानवशात् किंचिद् अपराधं भूयते तदा तयं कृत्वा सदाचरणेन पापक्षरणं भवितुं शक्यते। इदं दर्शयते कालिदासेन। अतएव दुर्वाशसः शापात् हेतोः दुष्यन्तस्य शकुन्तलायाश्च दीर्घकालीनस्य वियोगस्य परिस्थितेः उत्पन्नत्वात् तस्याम् अवस्थायां क्षालितायां निरस्तायां वा सत्याम् प्रेम्णः यत् स्वरूपं अभिव्यज्यते तत् निर्मलं सत् अतीव उज्ज्वलम्, भास्करम् उदात्तम आध्यात्मिकं च अस्ति। तदा तु दुष्यन्तः रूपसौन्दर्य उपेक्ष्य शकुन्तलायाः संस्कारविहीनस्य अश्रुपूरितस्य रूपदर्शनेन तृप्तः अस्ति।

वाष्पेण प्रतिपिवेदपि जयशब्दे जितं मया
यत्र दृष्टभसंस्कारपाटलोष्ठपुरं मुखम।।[14]

स्वयं निर्णीत एतादृशः गान्धर्वरीत्या विवाहः असुरक्षितः आसीत्। अतएव शारङरवस्य उक्तिना कालिदासः स्वं मनोभावं प्रकटितः कर्तु दृश्यते यदा दुष्यन्तः शापप्रभावात् शकुन्तला स्वं राजसभायां अपमानितं करोति तदा शाईरवः शकुन्तलां प्रति कथयति–

अतः परीक्ष्य कर्त्तव्यं विशेषात् संगतं रहः
अज्ञातछदयेष्वेवं वैरी भवति सौर्हदम्।।[15]

अर्थात् शकुन्तले! अवलोक्य कीदृगभूतं चापलस्य फलम्। अंतः विवाहात्मकमेकान्तसम्मेलनं अपरिचितेन पुंसां सह न कदापि विधेयम्। यस्य पुंसः व्यवहारादिना छदयं सम्यक् परीक्षितं स्यात् तेन सह तथाविधः सम्बन्धोविधयऽ अज्ञाते कृता मैत्री पर्यवसाने सन्तापकारी दुःखदायिनी च भवति।
परम शकुन्तलामुपरि आश्रमीयशिक्षायाः प्रभावः आसीत्। सा दुष्यन्तेन अपमानिता भूत्वाऽपि तपोनिष्ठ सदाचरणेन पुनः मारीचाश्रमे एवं पतिं प्राप्तवती। अस्मिन् नाटके शास्त्रसम्मतं उपदेशं कण्वेन शकुन्तलायै पत्युः गृहे प्रस्थानकाले यः दीयते सः वस्तुतः सुखददाम्पत्यजीवनस्य मूलमंत्रः अस्ति। अद्यापि सः उपदेशः तथैव महत्वं दधति यथा कालिदासकाले आसीत्। कण्वः कथयति–

शुश्रूषस्व गुरून् कुरू प्रियसखीवृत्ति सपत्नीजने
भर्तृर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्से किनी
यान्त्येवं गृहिणां पदं युवतयो वामाः कुलस्याधयः।।[16]

अर्थात् वत्से! त्वं मत्सकाशात् पतिगेहमुपगता प्रत्यहं श्वश्रू श्वसुरं च पदसंवहन ब्याजनोभूलनादिना परिचरन्ती तेषामाश्रवा भव। तस्मिन् पतिगृहे बछयः सपन्यो भवेयुः तासु प्रियसखीवद् व्यवहर्तव्य्। भर्ना अपमानिताऽपि ईर्ष्यावशात् कथमपि न पत्युर्विरूद्धमाचरणीयम्, भृत्यवर्गे चाभीष्टसम्पादनद्वारा उपकारभारं प्रकटयन्ती। तत्रानुरागिणी भव, सौभाग्यात् कदापि गर्वमावह, हर्षविषादयोः चित्रवृत्तेः समत्वं सम्पादनीयम् इत्थं विदधाना नार्यः गृहिण्यो भवन्ति। प्रतीपमाचरन्त्यो भर्तृकुलस्य पितृवंशस्य च दुर्यशो जनकत्वाद् क्लेशजनिका एव जायन्ते। अतस्त्वं गुरूजन शुश्रूषादिना शीघ्रमेव महादेवी पदं प्राप्स्यसि।
रघुवंशमहाकाव्ये अज इन्दुमती विवाहप्रसङगे स्वयंवरविवाहस्य वर्णनं करोति कालिदासः। तस्मिन् काले मनोनकलवरचयनस्य अधिकारः कन्यायै आसीत। परम राजपरिवारेष स्वयंवरसभायाः आयोजनं संभवः आसीत्। सामान्यवर्गे एतादृशः द्रव्यानां व्ययः संभवः नासीत्। अस्मिन् विवाहे कन्या मनोनुकूलवरं चयनितं कृत्या प्रसन्नतापूर्वकं दाम्पत्यजीवनं यापयतिस्म। परमपराजितराजा राजकुमाराः विजेता राजकुमारसुंधरि आक्रमणं करोतिस्म। एतादृशौ परिस्थितौ अकारणरक्तपातः भूयतेस्म। अत एव विवाहस्य एतादृशः पद्धतिः अतिश्रेयस्करः नासीत्।

कालिदासीयसाहित्ये आसुरपद्धत्या विवाहस्य अप्रत्यक्षसूचनां प्राप्यते एकेनलोकोक्तिना– ''दुहितृशुल्कसंस्थया''[17]

परिस्थितिविशेषं एतादृशः विवाहः क्रियतेस्म। कन्यापक्षी वरपक्षतः द्रव्यं विना अन्यं प्रतिज्ञा कारयित्वा कन्यां प्रत्यर्पितं कुर्वन्तिस्म। एतादृशः विवाहस्य अधमकोट्यांपरिगणितमासीत्।

अत एवं दाम्पत्यजीवनस्य आदर्शः तु इदमेवासीत् यत् सः सर्वेषां सहमति प्राप्तं कृत्वा विधिपूर्वकं भवतु। विवाहकाले अद्यापि विविध कृत्यानां सम्पादनं क्रियते। तदुपरान्ते एकाः स्त्री एकः पुरूषः दम्पती कथ्यते। पुनर्मिलनं भवति।

**सन्दर्भ–सूची–**


1. शान्तिपर्व– (महाभारत) अ. 144/श्लो 6
2. ऋग्वेद – 10/52/46
3. ऋग्वेद – 3/53/14
4. नीतिशास्त्रम् (नीतिवाक्यम्)
5. मनुस्मृति– 3/21
6. कुमारसंभवम्– 6/1, अथ विश्वात्मने गौरी संदिवेश नि्थः सखीम्
7. कुमारसंभवम्– 6/32, दातामू भुभृतां नाथरू प्रमाणां क्रियतामिति।
8. नादरपुराण– 28/61
9. कुमारसंभवम्–7/5
10. कुमारसंभवम्– 7/83
11. कुमारसंभवम्– 7/85
12. वशिष्ठस्मृ– 5/4, बौधायनस्मृ– 2/52, मनुस्मृ– 9/3
13. अभि.शा.–अंक– 4
14. अभि.शा.– 7/23
15. अभि.शा.– 5
16. अभि.शा. 4/17 मालविकाग्निमित्रम् पाणिग्रहणं तृतीया राज्ञीरूपेण अग्नि
17. रघु– 11/38

    मित्रेण सह प्रक्रियते। कालिदासः निःसंकोचरूपेण चित्रितं करोति विवाहस्य स्वरूपम्। अन्तः पुरे नारीणां स्थितिः दयनीयः आसीत्। अतएव विशेषरूपेण समाजे नारी शिक्षायाः आवश्यकता आसीत्। बहुविवाहवारणाय नारीणां जागृति आवश्यक आसीत्। कालिदासः विलासितां परित्यज्य शिक्षिता भवितुं नारी शिक्षयति। आत्मनिर्भरा नारी सुखददाम्पत्यजीवनं यापयितुं शक्यते।